अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MAS-303**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**एम.ए. संस्कृतम्, (सत्रम् : तृतीयसत्रम)**
**नाट्यसाहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. स्वप्नवासवदत्ते महाकवेर्भासस्य नाट्यकलावैशिष्ट्यं विवेचनीयम्।
2. स्वप्नवासवदत्तस्य कथासारो लेखनीयः।
3. अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य सांस्कृतिकं सौन्दर्यं वर्णयन्तु।
4. अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्य महत्त्वं प्रतिपादनीयम्।
5. मुद्राराक्षसस्य प्रथमाङ्कस्य कथावस्तुनो महत्त्वं निरूपणीयम्।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

**सप्रसङ्गव्याख्या विधेया –**

1. यदा तु भाग्यक्षयपीडितां दशा
   नरः कृतान्तोपहितां प्रपद्यते।
   तदास्य मित्राण्यपि यान्त्यमित्रता
   चिरानुरक्तोऽपि विरज्यते जनः।।
2. वसन्तसेनायाश्चरित्रचित्रणं वर्णयतु।
3. सप्रसङ्गपूर्वकं सूक्तेर्व्याख्या करणीया –
   अर्थो हि कन्या परकीया एव
4. न खलु धीमतां कश्चिदविषयो नाम – इति सूक्तेः व्याख्यां कुर्वन्तु ।
5. मुद्राराक्षसनाटकस्य "धन्या केयं स्थिता ते शिरसि"
   इति मङ्गलपद्यं विलिख्य भावार्थं प्रकाशयन्तु।
6. चाणक्यस्य चरित्र-चित्रणं कुरुत।

## खण्डः ग

## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. दुःखं न्यासस्य रक्षणम् – सूक्तिरियं कस्य वर्तते?
   (अ) विशाखदत्तस्य (ब) भासस्य
   (स) कालिदासस्य (द) शूद्रकस्य
2. मृच्छकटिके कस्य सङ्गीतं चारुदत्तः शृणोति ?
   (अ) शर्विलकस्य (ब) तानसेनस्य
   (स) विदूषकस्य (द) रेभिलस्य
3. ऋषिः कण्वः तीर्थाटनाय कुत्र गतवान् ?
   (अ) सोमतीर्थम् (ब) श्रीक्षेत्रतीर्थम्
   (स) हरिद्वारतीर्थम् (द) प्रयागतीर्थम्
4. रोहसेनः कस्य पुत्रः ?
   (अ) धर्मदत्तस्य (ब) सोमदेवस्य
   (स) चारुदत्तस्य (द) पालकस्य
5. देवीचन्द्रगुप्तं केन विरचितम् ?
   (अ) अम्बिकादत्तव्यासेन (ब) भासेन
   (स) विशाखदत्तेन (द) शूद्रकेण
6. कस्मिन् अङ्के वासवदत्ता उदयनस्य स्वप्ने आगता ?
   (अ) तृतीयाङ्के (ब) चतुर्थाङ्के
   (स) पञ्चमाङ्के (द) षष्ठाङ्के
7. अभिज्ञानशाकुन्तले कोऽङ्गीरसः ?
   (अ) शृङ्गारः (ब) वीरः
   (स) करुणः (द) हास्यः
8. "ते भृत्याः नृपतेः कलत्रमितरे, सम्पत्सु चापत्सु च" –
   – उक्तिरियं केन निगदिता ?
   (अ) शिष्येण (ब) चाणक्येन
   (स) सूत्रधारेण (द) चन्दनदासेन
9. कः मैत्रेयः ..........................................................
   (अ) चारुदत्तः (ब) शकारः
   (स) संवाहकः (द) विदूषकः
10. पद्मावती कस्य देशस्य राजकुमारी बभूव ?
    (अ) वत्सदेशस्य (ब) अवन्तिकादेशस्य
    (स) मगधदेशस्य (द) कलिङ्गदेशस्य

---------------x---------------